Roll No. : | | | | | | | |

# DAV PUBLIC SCHOOLS, ODISHA ZONE-1

## ANNUAL EXAMINATION- 2017-18

- Check that this question paper contains 9 printed pages
- Check that this question paper contains 14 questions.
- Write down the Serial Number of the question before attempting it.
- 15 minutes cooling time has been allotted to read this question paper only and do not write any answer on the answer book during this period.

## सस्कृतम् (सम्प्रेषणाधारितम्)

## COMMUNICATIVE SANSKRIT

## CLASS-IX

*अवधि : होरात्रयम्* — *पूर्णाङ्क : 80*

*निर्धारित समय : 3 घण्टे* — *अधिकतम अंक : 80*

*Time Allowed : 3 Hours* — *Maximum Marks-80*

***निर्देशा: :***

***Instructions :***

*(i) अस्मिन् प्रश्नपत्रे चत्वार: खण्डा: सन्ति ।*

*इस प्रश्न-पत्र में चार खण्ड हैं ।*

*The question paper has four section.*

*(ii) प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि ।*

*प्रत्येक खण्ड के उत्तर एक ही जगह पर क्रम से लिखने होंगे ।*

*The answers to each section must be written at one place.*

*(iii) प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया ।*

*प्रश्न-पत्र के अनुसार प्रश्न-संख्या अवश्य ही लिखनी होगी ।*

*Write the question number according to the question paper.*

*(iv) सर्वेषां प्रश्नानाम् उत्तराणि* **संस्कृतेन** *लेखनीयानि ।*

*सभी* प्रश्नों के उत्तर **संस्कृत** में लिखिए ।

Answer all the questions *in **Sanskrit**.*

63

## खण्ड: क

## अपठित-अवबोधनम् - 10 अंङ्का:

1. **अधोलिखितं अनुच्छेदं पठित्वा प्रश्नानाम् उत्तराणि लिखत ।**

वन्दे भारतमातरम् । भारतभूमि: सजला, सफला, शस्यश्यामला अस्ति । इयं देवानाम् अपि मनांसि मोहयति । गंगा-यमुनादि- नद्य: स्वजलेन मातरम् अभिषिच्यन्ति । रत्नाकर: अस्या: पादौ प्रक्षालयति । हिमालय: उत्तरस्यां दिशि अस्या: रजत-किरीटमिव शोभते । धन्या: खलु वयम्, ये अस्यां भूम्यां सुखेन वसाम: । अत्र महर्षि: व्यास:, कवि: कालिदास: भगवान् राम:, कृष्ण:, महात्मा गान्धी तथा अन्ये अनेके महापुरुषा: जन्म गृहीतवन्त:, मातु: यश: जगति प्रसारितवन्तश्च । अस्माकम् अपि कर्त्तव्यम् अस्ति यत् वयम् अस्या: रक्षणे सदा उद्यता: भवेम, सच्चारि:त्र्येण च भारतभूमे: मस्तकम् उन्नतं कुर्याम । देवा: अपि गीतकानि गायन्ति यत् ते भारतभूमिभागा: धन्या: यत्र ते सुरत्वात् भूय: मनुष्या: भवन्ति ।

**(1) एकपदेन उत्तरत -** $^1/_2 \times 4 = 2$

(i) भारतभूमि: केषाम् अपि मनांसि मोहयति ?

(ii) गीतकानि के गायन्ति ?

(iii) वयं केन भारतभूमे: मस्तकम् उन्नतं कुर्याम ?

(iv) हिमालय: कस्यां दिशि शोभते ?

**(2) पूर्णवाक्येन उत्तरत -** $2 \times 2 = 4$

(i) कस्या: रजतकिरीटम् इव हिमालय: शोभते ?

(ii) के के जना: मातु: यश: जगति प्रसारितवन्त: ?

**(3) प्रदत्तविकल्पेभ्य: उचितम् उत्तरं चित्वा लिखत: ।** $^1/_2 \times 4 = 2$

(i) 'भवेम' इति क्रियापदस्य किं कर्त्तृपदं ?

(क) उद्यता: (ख) अस्या: (ग) वयम् (घ) यत्

(ii) अत्र 'अनेके महापुरुषा:' जन्म गृहीतवन्त: । अस्मिनवाक्ये विशेषणपदं किम् अस्ति ?

(क) अनेके (ख) महापुरुषा: (ग) जन्म (घ) गृहीतवन्त:

(iii) गद्यांशे 'इयं' सर्वनामपदं कस्मै प्रयुक्तम् अस्ति ?

(क) भारतभूमे: (ख) भूम्यै (ग) भारतभूमिम् (घ) भारतभूम्यै

(iv) 'भारतभूमि:' इति कर्त्तृ पदस्य किं क्रियापदम् अनुच्छेदे प्रयुक्तम् ?

(क) भवन्ति (ख) अस्ति (ग) भवेम (घ) वसाम:

**(4) अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं संस्कृतेन लिखत ।** 2

## खण्ड: ख 15 अङ्का:
### (रचनात्मककार्यम्)

**2. क्रीडादिवससमारोहस्य वर्णनपरं मित्रं प्रति लिखितम् पत्रं मञ्जूषापदानां सहायतया पूरयित्वा पुन: लिखत ।**

½ x 10=5

मन्दाकिनी छात्रावास:

तिथि................

प्रिय मित्र रमेश !

(i) ................ नमोनम: ।

अत्र कुशलं तत्रास्तु ।

अस्माकं (ii)................................ परह्य: एव क्रीडादिवस: मानितोऽभवत् । तत्र विद्यालयस्य च्छात्रा: अपूर्वेण उत्साहेन विविधासु क्रीडासु (iii)............................ अकुर्वन् । कबड्डी प्रतियोगितायां कैश्चित् कलात्मकविधिना क्रीडित्वा दर्शकानाम् मनांसि (iv)..................... मल्लयुद्धे विश्वामित्र: अपूर्वाणि लाघवानि अदर्शयत् । संगीतमयासनप्रतियोगितायाम् अवर्णनीयं कौतुहलम् (v)......................... सर्वे तद् (vi)..................... अति मोदमाना: (vii)..................... अस्तु ।


(viii).....................

(ix)....................

(x).....................

**मञ्जूषा** :- विद्यालये, सप्रेम, गता:, भागग्रहणम्, आसीत्, दृष्ट्वा, हृतानि, शोमेश:, भवदीयं, प्रियमित्रम् ।

3. **अध: प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्चवाक्यानि संस्कृतेन लिखत ।** 2 x 5 = 10




**मञ्जूषा** : चिकित्सालय:, औषधालय:, रूगणा:, उपचार:, अहर्निशं, सेवाम्, चिकित्सका:, जना:, स्वस्थ:, वाहनानि

**अथवा**

मञ्जूषाप्रदत्तशब्दानां साहाय्येन निम्नलिखितं विषयम् अधिकृत्य पञ्चसंस्कृतवाक्येषु एकम् अनुच्छेदं लिखत ।

**''संस्कृतस्य महत्वम्''**

**मञ्जूषा-** प्रेरणाप्रद:, अस्माकं संस्कृति:, सूक्तीनाम् संग्रह: कठिना, मधुरा, देववाणि ।

खण्ड : ग

अनुप्रयुक्तव्याकरणम् - 25 अङ्का:

4. **अधोलिखितप्रश्नानाम् उत्तराणिउत्तरपुस्तिकायां लिखत ।** 1 x 2 = 2

(i) उक्ति: - उ + क् + ............ + इ:

(क) त (ख) त् (ग) त्र (घ) त्त

(ii) प्रयच्छति - प् + र् + अ + य् + अ.............. + छ् + अ + त् + इ ।

(क) छ् (ख) य् (ग) च् (घ) स्

5. **निम्नलिखितानाम् वर्णानाम् समीचीनं उच्चारणस्थानं चित्वा लिखत ।** 1 x 3 = 3

(i) 'च्' वर्णस्य किम् उच्चारणस्यानम् अस्ति ?

(क) तालु: (ख) कण्ठ: (ग) दन्ता: (घ) मूर्धा

(ii) 'ऋ' वर्णस्य उच्चारणस्थानं किम् ?

(क) मूर्धा (ख) कण्ठ: (ग) तालु (घ) दन्ता:

(iii) 'विलीन:' इति पदे दन्तोष्ठयो: वर्ण अस्ति ।

(क) इ (ख) व् (ग) ल् (घ) न्

6. **अधोलिखितवाक्येषु रेखाङ्कितपदानां समुचितं सन्धि विच्छेदं वा प्रदन्तविकल्पेभ्य: चित्वा लिखत ।** 1 x 4 = 4

(i) सुखं हि **दुखान्यनुभूय** शोभते ।

(क) दुख + अनुभूय (ख) दुखानि + अनुभूय

(ग) दुखा + अनुभूय (घ) दुखान्य + अनुभूय

(ii) **परोपदेशे** पाण्डित्यं सुकरं भवति ।

(क) परो + उपदेशे (ख) पर + उपदेशे

(ग) परो + पदेशे (घ) पर + उप + देशे

(iii) **प्रात: + वन्दनीय:** अस्ति महात्मन: नाम ।

(क) प्रार्तवन्दनीय: (ख) पार्तवन्दनीय:

(ग) प्रातर्वन्दनीय: (घ) प्रांतवन्दनीय:

(iv) ते प्रश्नानां समाधाने **तल्लीना:** ।

(क) तद् + लिना: (ख) तत् + लीना:

(ग) तल् + ल्लीना: (घ) त + ल्लीना:

7\. **प्रदत्तविकल्पेभ्य: उचितशब्दरुपाणि चित्वा रिक्तस्थानानि पूरयत ।** 1 x 4 = 4

(i) ............. विचिन्त्य एव कार्यं कर्त्तव्यम् ।

(क) मत्या, (ख) मत्या: (ग) मत्याम् (घ) मतय:

(ii) जलम् अन्नं सुभाषितम् च एतानि........... रत्नानि सन्ति ।

(क) त्रय: (ख) त्रीणि (ग) तिस्त्र: (घ) त्रि

(iii) ........... संगत्या स: अपि विद्वान् अभवत् ।

(क) विदुषे (ख) विद्वद्भि: (ग) विदुषाम् (घ) विद्वान्

(iv) स: धावत: .......... अपतत् ।

(क) अश्व: (ख) अश्वात् (ग) अश्वेन (घ) अश्वा:

8\. **प्रदत्तविकल्पेभ्य: उचितधातुरूपं चित्वा रिक्तस्थानानि पूरयत ।** 1 x 4 = 4

(i) तौ शिष्यौ विद्यालये एव............. ।

(क) आस्ताम् (ख) आसीत् (ग) आसन् (घ) आस्त

(ii) उद्यमेन ते पर्वतं लङ्धयितुं............ ।

(क) शक्नोति (ख) शक्नुवन्ति (ग) शक्नुत: (घ) शक्नुथ:

(iii) वयं मानवा: देवेभ्य: ............ ।

(क) रोचेत (ख) रोचेमहि (ग) रोचेय (घ) रोचेयाताम्

(iv) सर्वे प्राणिन: आनन्दं ............ ।

(क) लभन्ताम् (ख) लभताम् (ग) लभेताम् (घ) लभेथाम्

9\. **उचित उपपदविभक्तीनां प्रयोगं रिक्तस्थानेषु कुरुत ।** 1 x 4 = 4

(i) लक्ष्मण: ...........विना अयोध्यायाम् स्थातुं नेच्छति स्म ।

(क) राम: (ख) रामात् (ग) रामस्य (घ) राम

(ii) कर्मचारिण: ...........प्रयोजनम् अस्ति ।

(क) वेतनस्य (ख) वेतनेन (ग) वेतनम् (घ) वेतनात्

(iii) ........... पुरत: सरस: सरोवर: अस्ति ।

(क) तरु: (ख) तरो: (ग) तरुणा (घ) तरव:

(iv) एकलव्य: ........... निपुण: ।

(क) धनुर्विद्या (ख) धनुर्विद्यायां (ग) धनर्विद्यया (घ) धनुर्विद्या:

10. अधोलिखितेवाक्येषु प्रकृतिप्रत्ययौ संयोज्य विभज्य वा प्रदत्त विकल्पेभ्य: चित्वा लिखत । 1 x 4 = 4

(i) सैनिक: **योद्धुम्** उद्यत: अस्ति ।

(क) युध् + तुमुन् (ख) यूध् + तुमुन् (ग) युद्ध + तुमुन् (घ) युध + तुमुन्

(ii) स: आलस्यं **त्यज् + क्त्वा** परीक्षायाम् उत्तीर्ण: भवति ।

(क)त्यक्त्वा (ख) त्यकत्वा (ग) त्यत्वा (घ) त्यजत्वा

(iii) गोविन्द: रामायणं **सम्पठ्य** शान्तिं लभते ।

(क) सम + पठ + ल्यप् (ख) सम् + पठ् + ल्यप् (ग) समपठ् + ल्यप् (घ) सम् + पठ् + य्

(iv) मालाकार: पुष्पाणि **चि + तुमन्** उद्यानं गच्छति ।

(क) चेतुम् (ख) चितुम् (ग) चिनितुम् (घ) चेन्तुम्

**खण्ड: - घ**

**पठित-अवबोधनम् - 30 अङ्का:**

11. (अ) गद्यांश:

**अधोलिखितं गद्यांशं पठित्वा प्रदत्त-प्रश्नानां उत्तराणिलिखित ।**

बाल: अष्टावक्र: मित्रै: सह क्रीडित्वा गृहं प्रत्यावृत: । स जननीम् अपृच्छत् 'मात: ! क्व आस्ते मम पिता' इति । साऽवदत् - "जात: तव पिता राजर्षे: जनकस्य सभां विदुद्भि: सह शास्त्रार्थाय गत: आसीत्, किन्तु अधुना यावत् न प्रतितिवृत: । अहमपि चिन्तातुरा अस्मि ।" इदं निशम्य अष्टावक्: प्रत्यवदत् - "जननी ! अलं चिन्तया । श्व: प्रभाते एव अहं राजसभां गत्वा ज्ञास्यामि का वार्ता " इति । माताऽवदत् "त्वं बालोऽसि । राजसभायां तव प्रवेशो न सुलभ: । तत्र तव उपहासोऽपि संभाव्यते ।" विलक्षणप्रतिभासम्पन्न: सर्वशास्त्रपारङ्गत: अष्टावक्र: अभाषत "मात: ! मा भैषी: ईदृशीं तादृशीं वा आशंकां मा विधेहि । अहं पित्रा सह क्षिप्रमागमिष्यामि ।"

**(1) एकपदेन उत्तरत -** 1 x 2 = 2

(i) कस्य पिता अधुना यावत् न प्रतिनिवृत: ?

(ii) कुत्र अष्टावक्रस्य उपहासोऽपि संभाव्यते ?

**(2) पूर्णवाक्येन उत्तरत -** 2 x 1 = 2

(i) अष्टावक्स्य जननी किमर्थं चिन्तातुरा आसीत् ?

**(3) उचितम् उत्तरम् चित्वा लिखत ।** ½ x 4 = 2

(i) गद्यांशे 'श्रुत्वा' इति पदस्य क: पर्याय: प्रयुक्त: ?

(क) प्रत्यवदत् (ख) ज्ञास्यामि (ग) निशम्य (घ) अभाषत्

(ii) राजसभायां तव प्रवेशो न सुलभ: । अत्र 'तव' इति सर्वनाम पदं कस्मै कृते प्रयुक्तम् अस्ति ?

(क) अष्टावक्र: (ख) अष्टावक्रे: (ग) अष्टावक्रस्य (घ) अष्टावक्राय

(iii) तव पिता राजर्षे: जनकस्य सभां विदूद्भि: सह शास्त्रार्थाय गत: आसीत् । अत्र 'आसीत्' इति क्रियापदस्य कर्त्तृपदं किम् अस्ति ?

(क) तव (ख) पिता (ग) राजर्षे: (घ) जनकस्य

(iv) गद्यांशे 'ह्य:' इति अव्यय पदस्य विपर्यय: किम् अस्ति ?

(क) एव (ख) श्व: (ग) अहम् (घ) प्रभात:

**(आ) पद्यांश:**

**अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नान् संस्कृतेन उत्तरत ।**

स जातो येन जातेन याति वंश: समुन्नतिम् ।
परिवर्तिनि संसारे मृत:को वा न जायते ।।

**(1) एकपदेन उत्तरत -** 1 x 2 = 2

(i) स: एव जात: येन जातेन वंश: किं प्राप्नोति ?

(ii) परिवर्तनशील: क: भवति ?

**(2) पूर्णवाक्येन उत्तरत -** 2 x 1 = 2

(i) परिवर्तिनि संसारे क: जात: ?

**(3) उचितम् उत्तरम् चित्वा लिखत ।** $\frac{1}{2}$ x 4 = 2

(i) 'गच्छति' इति क्रियापदस्य कृते क: पर्याय: । अत्र पद्यांशे प्रयुक्तम् अस्ति ?

(क) समुन्नतिम् (ख) जायते (ग) याति (घ) जाती

(ii) 'जात:' इति पदस्य विपर्यय: किम् ?

(क) परिवर्तनशील: (ख) मृत: (ग) येन (घ) याति

(iii) 'परिवर्तिनि संसारे' मृत: को वा न जायते । अत्र विशेषण पदं किम् ?

(क) संसारे (ख) परिवर्तिनि (ग) जायते (घ) मृत:

(iv) स जातो येन जातेन वंश: समुन्नतिम् याति । अत्र क्रियापदं किम् अस्ति ?

(क) समुन्नतिम् (ख) जातेन (ग) याति (घ) जातो

**(इ) नाट्यांश:**

**अधोलिखितं नाट्यांशं पठित्वा प्रदत्त प्रश्नान् उत्तरत ।**

राजपुत्र: - (राजोचितं प्रणम्य) विजयतां महाराज:, विजयताम् ।

प्रताप: - (समाश्वस्य) अयि भ्रात: ! कथं जयघोषं कृत्वा मां लज्जयसे ?

राजपुत्र: - देव ! कथं भवान् वदति एवम् ? किं न खलु कृतं भवता राज्यत्राणाय ? स्वदेशं स्वाधीनं कर्तुं भवता किं न सोढ़म् ? विजष्यते ननु भवान् !

प्रताप: - कुतस्तावद् विजय: ! स्वदेशमेव त्यक्तुं तत्परोऽहम् ।

(1) **एकपदेन उत्तरत -** 1 x 2 = 2

(i) राजपुत्र: कीदृशं पूणम्य कथयति ?

(ii) क: जयघोषं श्रुत्वा लज्जयते ?

(2) **पूर्णवाक्येन उत्तरत -** 2 x 1 = 2

(i) कथं पूतापेन दु:खं सोढम् ?

(3) **उचितम् उत्तरम् चित्वा लिखत ।** 1/2 x 4 = 2

(i) स्वदेशं स्वाधीनं कर्तुं भवता किं न सोढम् ? अत्र 'सोढम्' इति क्रिया पदस्य कर्त्तृपदं किम् अस्ति ?

(क) स्वदेशम् (ख) भवता (ग) स्वाधीनं (घ) कर्तुं

(ii) कथं जयघोषं कृत्वा मां लज्जयसे ? अत्र 'माम्' इति सर्वनामपदं कस्मै प्रयुक्तम् अस्ति ?

(क) राजपुत्राय (ख) भ्रात्रे (ग) पूतापाय (घ) मह्यम्

(iii) 'पराजय:' इति पदस्य कृते किं विपर्यय: नाट्यांशे प्रयुक्तम् अस्ति ?

(क) जय: (ख) विजय: (ग) विजष्यते (घ) विजयताम्

(iv) कथं भवान् वदति एवम् ? अत्र 'भवान्' इति कर्तृ पदस्य क्रिया पदं किम् अस्ति ?

(क) वदति (ख) एवम् (ग) कथं (घ) देव

12. **रेखाङ्कितपदानि आधृत्य प्रश्न निर्माणं कुरुत ।** 1 x 4 = 4

(i) आरुणि: **श्वेतकेतो:** पिता आसीत् ।

(ii) नकुलं हत्वा **ब्राह्मण:** आत्मनं मुषितं मन्यते ।

(iii) **उत्साहवतां** किञ्चिद् असाध्यं नास्ति ।

(iv) स्वस्थवृत्त: **आयुषा** न वियुज्यते ।

13. **अधोलिखितपद्यद्वयस्य अन्वयो: रिक्तस्थानानि पूरयित्वा पुन: लिखत ।**

(अ) ½x4 =2

विश्वबन्धुत्वमुद्घोषयत्पावनं
विश्ववन्द्यैश्चरित्रैर्जगत्पावयत् ।
विश्वमेकं कुटुम्बं समालोकयत्
भूतले भाति मेऽनारतं भारतम् ।।

**अन्वय:** - पावनं विश्वबन्धुत्वम् (i)———— , विश्ववन्दै: चरित्रै: जगत् (ii)———— ,विश्वम् एकम् कुटुम्बकम् (iii) ———— , मे भारतम् भूतले (iv) ———— भाति ।

(आ) ½x4 =2

धत्ते भरं कुसुमपत्रफलावलीनां घर्मव्यथां वहति शीतभवां रुजं च ।
यो सर्वमर्पयति चान्यसुखस्य हेतो: , तस्मै वदान्यगुरवे तरवे नमोऽस्तु ।।

**अन्वय:** - य: (वृक्ष:) कुसुमपत्रफलावलीनां भरं (i)———— घर्मव्यथां (ii)———— शीतभवां रुजं च (य:) अन्यसुखस्य हेतो: च सर्वम् (iii) ———— , तस्मै वदान्यगुरवे तरवे नम: (iv) ——— ।

14. प्रसङ्गानुसारम् रेखाङ्कितपदानाम् उचितम् अर्थम् चित्वा लिखत । 1x4=4

(i) तावत् अनयो: **विधेय:** भविष्यामि ।

(क) आज्ञापालक: (ख) पालक: (ग) कायर्यसिद्धिम् (घ) निधेय:

(ii) गृहाण **पुष्फलं** स्वर्णमयं पारितोषिकम् ।

(क) प्रभुतम् (ख) प्राचुर्यम् (ग) प्रयोजनम् (घ) अपरिहार्यम्

(iii) एवम् **अनुशिष्ट:** स मुनि: वनम् गतवान् ।

(क) परितुष्ट: (ख)सन्तोष: (ग) उपदिष्ट: (घ) अनुव्रत: ।

(iv) घटो नास्मि **जलान्वित:** ।

(क) कुर्चशमश्रुयुत: (ख).जलद: (ग)वारियुक्त: (घ)निर्जल: ।

***